# जातस्य हि ध्रुवो मृत्युः

आनन्दपुरे धनदासः धूर्तमतिश्चेति द्वौ प्रतिवेशिनौ न्यवसताम्। तयोः धनदासः अतिलोभाविष्ट, धूर्तमतिश्च वञ्चनानिपुणः।

अथ कदाचित् धूर्तमतिना चिन्तितम्, "लुब्धः एषः धनदासः अतीव मूर्खः। अतः केनाप्युपायेन वञ्चयेयम्"। एवं विचिन्त्य एकदा धनदासगृहमागत्य तेनोक्तम्, "भोः धनदास, श्वः मम गृहं बहवः आप्ताः आगमिष्यन्ति। तेषां कृते पर्याप्तानि भाण्डानि मम गृहे न सन्ति। अतः भवता कानिचन भाण्डानि दीयन्ताम्। अवसिते प्रयोजने प्रत्यर्पयेयं तानि" इति। तथेति उक्त्वा धनदासेन तस्मै कानिचन भाण्डान्यदीयन्त।

अपरेद्युः धूर्तमतिः भाण्डानि प्रत्यर्पयितुं धनदासगृहमागतः। तेन यथापूर्वं गृहितानि सर्वानि भाण्डानि आनितानि, तथा अन्यानि नूतनानि लघूनि भाण्डान्यपि । नुतनभाण्डानि दृष्ट्वा चकितेन धनदासेन भाषितम्, "भद्र, न एतानि भाण्डानि मम वर्तन्ते।" तत् श्रुत्वा उच्चैर्विहस्य धूर्तमतिना भणितम्, "अये, त्वया दत्तानि भाण्डानि मम गृहे रात्रौ प्रासुवत। तवैव भाण्डानामपत्यानि नूतनानि भाण्डानि एतानि। निःसंदेहं स्वीकृयन्तामेतानि भवता" इति। लोभाविष्टः धनदासः तानि स्वीकृत्य प्रमुदितः संजातः।

अथ गच्छता कालेन धूर्तमतिः पुनः धनदासं भाण्डानि प्रार्थयत। पुनरेकवारं बहूनि भाण्डानि लभेयाहमित्याशया धनदासेन तस्मै बहूनि भाण्डानि अदीयन्त।

तदनन्तरम् अतीतः मासः एकः। तथापि धूर्तमतिः भाण्डानि न प्रत्यार्पयत्। चिन्ताकुलेन धनदासेन धूर्तमतिमागत्य भाण्डानि अयाच्यन्त। "तव तानि सर्वाणि भाण्डानि मृतानि।" इति धूर्तमतेः

प्रत्युत्तरं श्रृत्वा कृध्देन धनदासेन गदीतम्, ” रे वञ्चक, अपि विश्वसनीयं तव एतद् वचः ? अचेतानि भाण्डानि म्रियन्ते किम् ? अलीकं तव वचनम्” इति। तदा शान्तस्वरेण धूर्तमतिरभाषत, ”भद्र, अलं कोपेन। यथा पूर्वं भाण्डानि जातानि, तथा इदानिं मृतानि। यतः जातस्य हि ध्रुवो मृत्युः” इति।

तत् श्रृत्वा अधोमुखः धनदासः गृहमव्रजत्।